श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री आपटीकर विरचितः

# ॥ श्रीहनूमत्संस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहनूमत्संस्तवः ॥

नमाम्यञ्जनीनन्दनं वायुपुत्रं
    नमामि प्रभुं वानराणां गणानाम्।
सदा रामनामामृतं सेवमानं
    नमामि प्रभुं मारुतिं रामदूतम्॥ 1 ॥

तडित्तेजसं वायुवेगं बलिष्ठं
    चिरञ्जीविनं दिव्यवज्राङ्गदेहम्।
दितेः सन्ततिं संहरन्तं कपीन्द्रं
    वरेण्यं शरण्यं नितान्तं भजेऽहम्॥ 2 ॥

महासागरं लीलया लङ्घयित्वा
    त्वयाऽऽश्वासिता भूमिकन्या सशोका।
त्वया राक्षसेन्द्रस्य लङ्का विदग्धा
    त्वयैतादृशी स्वामिसेवा विधत्ता॥ 3 ॥

त्वदीयेन वेगेन तुल्यो न वायु -
    र्न वा मानसं मानवानां कपीश।
सुमित्रासुतप्राणरक्षार्थमेव
    गिरीन्द्राग्रमुत्पाट्य वेगेन नीतम्॥ 4 ॥

वरिष्ठा वदान्याऽस्ति सेवा त्वदीया
    प्रभू रामचन्द्रस्त्वयैव प्रसन्नः।
त्वमेवासि चादर्शभूतो नराणां
    भवत्पादपद्मं सदा वन्दनीयम्॥ 5 ॥

त्वमेवाग्रणीर्धीवराणां नराणां
    त्वमेवासि नेता बलोपासकानाम्।
भुभुःकारनादेन रक्षः समूहा -
    स्त्वया नाशिता वानरेन्द्रेण सर्वे॥ 6॥

दशास्यस्य कीर्तिं विनाशं नयन्तं
    सुदीनाञ्जनांस्तारयन्तं कपीन्द्रम्।
प्रभो रामचन्द्रस्य भक्तानवन्तं
    हनूमन्तमेकं स्मरामि प्रभाते॥ 7॥

अहङ्कारयुक्तश्च विद्यामदान्धः
    सदा द्रव्यलुब्धोऽहमक्रोधहीनः।
महामोहयुक्ते भवेऽस्मिन्निमग्नं
    हनूमन् हताशं जनं पाहि नित्यम्॥ 8॥

इमं संस्तवं रामदूतस्य रम्यं
    पठेत् सादरं यो नरो भक्तियुक्तः।
समस्तानि दुःखानि नीत्वा विनाशं
    भवेत्तस्य वातात्मजः सौख्यदाता॥ 9॥

॥ श्रीहनूमत्संस्तवः समाप्तः॥